# नेपालदेशीयपञ्चाङ्गपत्रे मुहूर्तमार्तण्डस्य संस्कारप्रकरणोक्तानां संस्काराणां मुहूर्ताध्ययनम्

अम्बरराजढकालः
उपप्राध्यापकः - ज्योतिषम्
ने.सं.वि., पिण्डेश्वरविद्यापीठम्, धरानम्
dhakalguru12@gmail.com

https://doi.org/10.3126/pj.v5i8.73794

## लेखसारः

*सनातनसंस्कारप्रिये नेपालदेशीये हिन्दूसमाजे जनानां प्राग्जन्मसंस्काराः शिशुसंस्काराः बाल्यसंस्काराश्च प्रयोजनहीनसदृशाः विलुप्तप्रायाः दृश्यन्ते । गर्भाधानादि अन्नप्राशनपर्यन्तानां संस्काराणां शास्त्रीयविधिनिषेधसहितः व्यावहारिकप्रयोगोपागमः सम्प्रति लोपोन्मुखो दृश्यते । प्राग्जन्मसंस्कारेषु प्रथमरजोदर्शनं गर्भाधानं पुंसवनं सीमन्तोन्नयनमेते संस्काराः तेषां शुभमुहूर्ताश्च जनानां जीवनव्यवहाराद् विलुप्तप्रायाः सञ्जाताः । शिशुसंस्कारेषु जातकर्म-नामकरण-पालकारोहण-भूम्युपवेशन-दुग्धपान-निष्क्रमणञ्चेति संस्काराश्च सम्प्रति विस्मृतप्रायाः विद्यन्ते । बाल्यसंस्कारेषु कर्णवेध अन्नप्राशनं चूडाकरणमुपनयनञ्चेति संस्काराः तेषां शुभमुहूर्ताश्चाद्यतनेऽस्मिन् युगे शास्त्रीयाचारहीनोन्मुखा दृश्यन्ते । नेपालदेशीयेषु पञ्चाङ्गपत्रेषु चैतेषां संस्काराणां शुभमुहूर्तनिर्देशनं प्रायो नैवोपलभ्यते । पञ्चाङ्गपत्रेषु मुहूर्तमार्तण्डस्य संस्कारप्रकरणोक्तानां संस्कारणां मुहूर्तस्य प्रयोज्यमानस्थितिरत्राकलनं कृतं विद्यते । तेन एतेषां मुहूर्तानां शास्त्रीयप्रमाणाधाररूपाणां मुहूर्तमार्तण्डस्य संस्कारप्रकरणोक्तानां शुभमुहूर्तानामत्र समीक्षणं कृतमस्ति । नेपालदेशीयपञ्चाङ्गपत्रेषु गर्भाधानादि निष्क्रमणान्तानां सप्तसङ्ख्यकानां संस्काराणां शुभमुहूर्तो प्रकाशितो नैव दृश्यते । पञ्चाङ्गेषु अप्रकाशितेन तेषां संकाराणां प्रयोगपरम्परा सनातनसंस्कृतिप्रिये नेपालदेशीये हिन्दूसमाजे प्रायः विलुप्ता जाता । अतः तेषां प्रयोगपरम्परा पुनर्स्थापनाय पञ्चाङ्गकाराः स्वकीये पञ्चाङ्गपत्रे तन्मुहूर्तनिर्देशनपुरस्सरं प्रकाशनं कुर्युरिति निष्कर्ष अस्मिन् शोधनिबन्धे उद्घाटितो विद्यते । गुणात्मिकायामनुसन्धानपद्धत्यमाधारितेऽस्मिन् शोधनिबन्धे पुस्तकालयकार्यद्वारा सङ्कलितानां प्राथमिकद्वितीयकस्रोतसामग्रीणामुपयोगं विहितमस्ति । मुहूर्तशास्त्रस्य सैद्धान्तिकपक्षं यथास्थानमुपयुज्य सङ्कलिततथ्यानां विश्लेषणविधिना समान्यीकरणसत्यापनपूर्वकं निष्कर्षमुद्घाटितं विद्यते ।*

*शब्दकुञ्जी :* अन्नप्राशनमुहूर्तः, कर्णवेधमुहूर्तः, गर्भाधानमुहूर्तः, नेपालदेशीयपञ्चाङ्गम्, मुहूर्तमार्तण्डः, व्रतबन्धमुहूर्तः

## विषयपरिचयः

तिथिवारनक्षत्रयोगकरणात्मिकां पञ्जिकां पञ्चाङ्गपत्रमुच्यते । पञ्चाङ्गपत्रे तिथिवारनक्षत्रादीनां घट्यात्मिका सूचना प्रकाश्यते । एकस्मिन् संवत्सरे पतिता अयनौ, ऋतवः, मासाः, पक्षौ, दिनानि ( तिथय, वाराः, नक्षत्राणि, योगाः,करणानि) च घट्यादिगणनापूर्वकं पञ्चाङ्गपत्रे प्रकाश्यन्ते । नेपालदेशीये पञ्चाङ्गपत्रे व्रतपर्वयात्रोत्सवसंस्कारादीनां मुहूर्ताः प्रकाशिताः विराजन्ते । वैदिकसनातनधार्मिककृत्यस्य शुभाशुभमुहूर्ताश्च पञ्चाङ्गपत्रे निर्देशिताः विद्यन्ते । तत्र निर्देशितानां मुहूर्तादीनामाधारग्रन्थाः विशेषतः ज्योतिषशास्त्रस्य मुहूर्तवाङ्मयसम्बद्धाः दृश्यन्ते । तत्सम्बद्धेषु मुहूर्तग्रन्थेषु मुहूर्तगणपत्युक्तान् मुहूर्तचिन्तामण्युक्तान् मुहूर्तमार्तण्डोक्तांश्च शोडषसंस्कारजन्यान् विषयाननुसृत्य पञ्चाङ्गपत्रे गर्भाधानादीनां संस्काराणां मुहूर्ताः निर्धारिताः दृश्यन्ते ।

नारायणदैवज्ञेन रचितो मुहूर्तमार्तण्डो ज्योतिषशास्त्रे सुप्रसिद्धतमो मुहूर्तग्रन्थो वर्तते । मुहूर्तानां मार्तण्डः (सूर्यः भास्करो वा) इति मुहूर्तमार्तण्डः । ग्रन्थोऽयं सर्वेषु मुहूर्तग्रन्थेषु मार्तण्ड इव मुहूर्तज्योतिप्रकाशको मन्यते । श्रीशालिवाहनीयशाके १४९३ तमे वत्सरे[1] श्रीवीरविक्रमादित्ये १६२८ तमेब्दे रचितोऽयं ग्रन्थः ज्योतिषशास्त्रस्य मुहूर्तवाङ्मये सर्वत्र लब्धप्रतिष्ठो वर्तते । नेपालदेशीयेषु पञ्चाङ्गपत्रेष्वपि मुहूर्तमार्तण्डोक्तः शास्त्रीयप्रमाणाधारेण गर्भाधानादिसंस्कारणां मुहूर्तनिर्देशनपरम्परा परिदृश्यते ।

ग्रन्थेस्मिन् सन्ति द्वादशप्रकरणानि । त्याज्यः नक्षत्रः संस्कारः विवाहः अग्न्याधानः वास्तुः यात्रा मिश्र अनध्यायः पल्लिसरः गोचरः संक्रान्तिश्चेति । तत्र तृतीयं संस्कारप्रकणं विद्यते । तत्रोक्तानां कतिपयानां संस्काराणां प्रयोगः नेपालदेशीये पञ्चाङ्गपत्रे बाहुल्येनोपयुज्यते । शोधनिबन्धेऽस्मिन् नेपालदेशीये पञ्चाङ्गपत्रे मुहूर्तमार्तण्डस्य संस्कारप्रकरणोक्तानां गर्भाधानादि व्रतबन्धपर्यन्तानां संस्काराणां निर्देशनप्रकाशनस्थितेः समीक्षा विधीयते ।

ग्रन्थकारस्य नारायणस्य विशेषेतिवृत्तिर्नोपलभ्यते । ग्रन्थस्यावसाने ग्रन्थप्रशस्तिकथनक्रमे

---

[1] त्र्यङ्केन्द्र(१४९३) प्रमिते वर्षे शालिवाहनजन्मतः । कृतस्तपसि मार्तण्डऽयमलं जयतूद्गतः ॥ ( मुहूर्तमार्तण्ड,१२ प्रकरणम्, ग्रन्थप्रशस्ति, श्लोक ३)

श्लोकत्रयेणास्य स्वल्पपरिचयः प्राप्यते ।[२] असौ कौशिकगोत्रीयः वाजसनेयी शाखाध्यायी ब्राह्मण आसीत् । अस्य पीता प्रजाभिरर्चितः शमदमतपदानाध्ययनादि गुणसम्पन्नः जितेन्द्रियो वेदनिधिः स्मृतिज्ञो दृढव्रतो यज्ञकृदन्नदातेत्यादि गुणसम्पन्नो ज्योतिर्विदनन्तदैवज्ञरासीत् । असौ देवगिरेः उत्तरस्यां दिशि पुराणप्रसिद्धात् श्रीघृष्णेशज्योतिर्लिङ्गादुत्तरस्यां दिशि टापरग्रामनिवासीरासीदिति मार्तण्डबल्लभा टीका सूचयति । ग्रन्थकर्ता नारायणदैवज्ञः गजाननं अम्बां सरस्वतीं श्रीविष्णुं सूर्यादिनवग्रहान् निजगुरुन् च नमस्कृत्य मुहूर्तमार्तण्डनामग्रन्थं विस्तारयति । ज्योतिर्वदां हर्षाय बह्वर्थमभिसिञ्चतः लघुकायः ग्रन्थोऽयमतिशयेनाल्पत्वेनापि अर्थबहुलं बह्वर्थेऽपि दुर्बोधसङ्गां परिहरति । शार्दूलविक्रीडितस्रग्धरादि विविधवृत्तैः निबद्धः मुहुर्तमार्तण्डपठनेन अस्यार्थबोधनेन च दैवविन्मौहूर्तिकः विश्वपूज्यो भवति । नकेवलं विश्वप्रतिष्ठतं भवत्यपितु बह्वायुः सुखधनमित्रपुत्रभृत्यान् सम्प्राप्नोति । जनानां यथार्थमूहूर्तदानात् साधितकार्येण कार्यसिद्धजनितपुण्येन च दैवज्ञः दीर्घायुरारोग्यादीनि सम्प्राप्नोति । ग्रन्थेऽस्मिन् यद्गर्भाधानादिकं मुहूर्तमुक्तं तन्मध्ये बहुसंहिताग्रन्थेषु पठनेऽपि दैवज्ञ अविकल धीर्भवति । तेन ग्रन्थोऽयं पठनेन मुहूर्तशास्त्रे तीर्थसिद्धिं ( शास्त्रसिद्धिं ग्रन्थसिद्धिं वा ) चाप्नोतीति ग्रन्थकारः सूचयति ।[३] ग्रन्थस्यास्य ग्रन्थकृत्विरचिता मार्तण्डवल्लभा संस्कृतव्याख्योपलभ्यते । केदारदत्तजोशिः सुरकान्तझा सत्येन्द्रमिश्रः प्रभृतीनां टीकाकाराणां हिन्दीव्याख्यान्वितानि पिडिएफाख्यानि पुस्तकानि सम्प्रति गुगलसञ्जालमध्ये उपलभ्यन्ते ।

**समस्याकथनम्**

नैपालकेषु प्रकाशितेषु पञ्चाङ्गपत्रेषु गर्भाधानादि षोडशसंस्काराणां मुहूर्तनिर्वाचनसम्बद्धा प्राज्ञिकजिज्ञासा हि शोधनिबन्धस्यास्य मूलसमस्या वर्तते । "नेपालदेशीयपञ्चाङ्गपत्रे मुहूर्तमार्तण्डस्य संस्कारप्रकरणोक्तानां संस्काराणां मुहूर्ताध्ययनम्" इति शीर्षकमवलम्ब्य विलिख्यमाने शोधनिबन्धेऽस्मिनधोलिखितेन प्राज्ञिकप्रश्नेन समस्याकथनं विहितमस्ति ।

क. नेपालदेशीयपञ्चाङ्गपत्रे गर्भाधानादि व्रतबन्धपर्यन्तानां संस्काराणां मुहूर्तनिर्धारणस्य शास्त्रीयाधार कः?

ख. पञ्चाङ्गपत्रे शुभमुहूर्तनिर्वाचनस्य शास्त्रीयाचारश्च कथं निर्देशितो विद्यते ?

---

[२] श्रीमत्कौशिकपावनो हरिपदद्वन्द्वार्पितात्माहरिः तज्जोऽनन्त इलासुरार्चितगुणो नारायणस्तत्सुतः ॥ ( पूर्ववत् , श्लोक १. )

[३] यः षष्ट्यायुतशत(१६०) वृत्तबद्धमेनम् । मार्तण्डं पठति नरः स विश्वपूज्यः ॥ बह्वायुः सुखधनपुत्रमित्रभृत्यान् संप्राप्नोत्यविकलधीश्च तीर्थसिद्धिम् ।

ग. प्रकाशितेषु पञ्चाङ्गपत्रेषु  तेषां संस्काराणां मुहूर्तप्रदानस्य हेतु कः ?

## शोधोद्देश्यम्

नैपालकेषु प्रकाशितेषु पञ्चाङ्गपत्रेषु निर्दिष्टानां गर्भाधानादि व्रतबन्धपर्यान्तानां संस्काराणां तत्सम्बद्धमुहूर्तानां च शास्त्रीयमूलप्रमाणान्वेषणं हि शोधनिबन्धस्यास्य मूलमुद्देश्यं वर्तते । उपर्युल्लिखितानां समस्यानां समाधानमेवास्य शोधलेखस्योद्देश्यं वर्तते । तदत्र विन्दुवाक्यैरधः प्रस्तूयते ।

क. नेपालदेशीयपञ्चाङ्गपत्रे गर्भाधानादि व्रतबन्धपर्यन्तानां संस्काराणां मुहूर्तनिर्धारणस्य शास्त्रीयाधारान्वेषणम् ।

ख. पञ्चाङ्गपत्रेषु शुभमुहूर्तनिर्वाचन शास्त्रीयाचारः तेषां निर्देशनव्यवस्था प्रयोगस्थितिश्च विश्लेषणम् ।

ग. प्रकाशितेषु पञ्चाङ्गपत्रेषु गर्भाधानादि व्रतबन्धपर्यन्तानां संस्काराणां मुहूर्तप्रदानस्य हेतोः समीक्षणम्

## सीमाङ्कनम्

शोधनिबन्धेऽस्मिन् निर्धारितोद्देश्यपरिपूर्तये नेपालराकीयपञ्चाङ्गनिर्णायकसमितिद्वारा स्वीकृतिप्राप्य समित्याः निर्णयानुसारेण निर्णितेषु प्रकाशितेषु च पञ्चाङ्गपत्रेषु निर्दिष्टानां गर्भाधानादि व्रतबन्धपर्न्तानां संस्काराणां केवलमत्र समीक्षणं विधीयते । पुनश्च नाराणयदैवज्ञकृतस्य मुहूर्तमार्तण्डोक्तस्य संस्कारप्रकरणस्य मुहूर्तशास्त्रीयसिद्धान्तभूतान् विषयानत्र प्रमाणत्त्वेन वृण्वते ।

## शोधविधिः

अस्य शोधनिबन्धस्योद्देश्यं सम्यक्तया परिपूरणाय पुस्तकालयकार्यमुपयुज्य तथ्यसामग्रीसङ्कलनं विहितमस्ति । अन्वेषितानां सामग्रीणां सूक्ष्मतयाधीत्य तथ्यनिस्सारणार्थं  वर्णनात्मकेन विश्लेषणात्मकेन समीक्षणात्मकेन तुलनात्मकेन च शोधविधिनेदं शोधालेखं विनिर्मितम् ।

## पूर्वाध्ययनपर्यावलोकनम्

केदारदत्तजोशिः (ई.सं.१९९३) मुहूर्तमार्तण्डस्य हिन्दीव्यख्याकारः सम्पादको वा वर्तते । हिन्दीभाषायां लिखितायां ***मुहूर्तमार्तण्डग्रन्थस्यास्य भूमिकायां*** ग्रन्थसमीक्षणक्रमे प्रकरणगतानां विषयाणां संक्षिप्तविवेचनं कृतमस्ति । तेन सम्पादितस्यास्य ग्रन्थस्य संस्कारप्रकरणोक्तानां संस्काराणां ससमीक्षा

परिचयञ्च प्रदत्तमस्ति परं तत्रोक्तानां संस्काराणां मुहूर्तस्य ग्रन्थेऽपेक्षितः प्रयोगः पञ्चाङ्गपत्रे कथं विधियते इति तु तस्योद्देश्यं नास्ति ।

विश्वपञ्चाङ्गम् ( २०७९) इति सुविख्याते काशी हिन्दू विश्वविद्यालयेन प्रकाशिते पञ्चाङ्गपत्रे स्त्रीणामाद्यरजोदर्शने शुभाशुभकालादि गर्भसंस्कारात् व्रतबन्धविवाहपर्यन्तानां सर्वेषां संस्काराणां मुहूर्ताः शुभाशुभकालदिग्दर्शनपूर्वकं सारेखमेकस्मिन् पृथक्पृष्ठे निर्दिष्ट्य प्रकाशितं विद्यते । एवं वाराणसीतः प्रकाशितेष्वन्येषु पञ्चाङ्गेष्वपि सर्वजनोपकाराय गर्भाधानादि सर्वेषां संकाराणां मुहूर्ता एकस्मिन्नेव पृष्ठे सुस्पष्टं सारेखं निर्दिश्य प्रकाशितं विद्यते।

पुरुषोत्तमभट्टराई (२०८०) ***" व्रतबन्ध र विवाह संस्कारमा मुहूर्त निर्धारणको शास्त्रीय व्यवस्था र नेपाली परम्परामा देखिएको भिन्नता एवम् एकरूपताको उपाय "*** इति शीर्षकान्विते वाल्मीकिविद्यापीठे वैक्रमाब्दे २०८० । १ । ११,१२ मितदिवसे ज्योतिषविभागद्वारा समायोजिते कार्यशालागोष्ठ्यां नेपालीभाषायां प्रस्तुते कार्यपत्रे व्रतबन्धमुहूर्तं समीक्षति । समीक्षणक्रमे असौ उपनयनसंस्कारस्य मुहूर्तशास्त्रीय कालमासतिथ्यादिमुहूर्तेन सह नेपालीपरम्परायाः त्याज्यग्राह्यमुहूर्तं तोलयति। व्रतबन्धमुहूर्तविश्लेषणक्रमे मुहूर्तचिन्तामणिरिति ग्रन्थस्य शास्त्रीयप्रमाणाननुदित्य नेपालीभाषायां उपनयनस्य कालशुद्धिः पञ्चङ्गशुद्धिः लग्नशुद्धिश्च समीक्षति। तत्र केवलमुपनयनमुहूर्तस्य समीक्षा हि तस्याभीष्टं दृश्यते। गर्भाधानादि संस्कारणां मुहूर्तमार्तण्डोक्तानां मुहूर्तानां पञ्चाङ्गपत्रापेक्षितसमीक्षा तु तस्योद्देश्यं नास्ति।

आमोदवर्धनः कौडिन्यायनः (२०८१) ***"गर्भसंस्कार र गर्भिणी संरक्षणका शास्त्रीय नियम "*** इति शीर्षकान्विते देशसञ्चारेत्याख्ये विद्युतीये (online) समाचारपत्रे गर्भाधानपुंसवनसीमन्तोन्नयनसंस्कारस्य महत्त्वं तद्फलञ्च प्रकाशयति परन्तु नैपालकेषु पञ्चाङ्गपत्रेषु मुहूर्तनिर्देशनस्य स्थितिः किदृशी वर्तते इति तस्याभिष्टं नास्ति।

अनेन पूर्वाध्ययनपर्यावलोकनेन नैपालकेषु पञ्चाङ्गपत्रेषु निर्दिष्टानां मुहूर्तादिविषयाणां समीक्षणमध्ययनं विश्लेषणकार्यञ्चावशिष्टं परिदृश्यते। तदभावं परिपूरणाय शोधकार्यमिदं विहितमस्ति।

## शोध्यविषयविश्लेषणम्

मुहूर्तमार्तण्डे तृतीये संस्कारप्रकरणे गर्भाधानादीनां व्रतबन्धपर्यन्तानां संस्काराणां शुभाशुभमुहूर्ताणां त्याज्यग्राह्यकालं सपद्यमुल्लिखितं विद्यते। गर्भाधानं पुंसवनं सीमन्तोन्नयनं जातकर्म नामकरणं पालकारोहणं

भूम्युपवेशनं दुग्धपानं निष्क्रमणं कर्णवेधः अन्नप्राशनं चूडाकरणं क्षौरनिर्णयः व्रतबन्धकालञ्चेति चतुर्दशसंस्काराणां शुभमुहूर्ता अस्मिन् प्रकरणे वर्णिताः विद्यन्ते । एतेषां संस्कारणां शुभमुहूर्तानां नेपालदेशीयपञ्चाङ्गपत्रे निर्देशनस्थितिः प्रयोगस्थितिश्च किदृशी विद्यते इत्यस्मिन् शोधकार्ये समीक्ष्यते । मुहूर्तनिर्धारणे प्रथमतः लग्नशुद्धि विचार्यते । साधारणलग्नबलविचारपूर्वकं शुभमुहूर्तान्वेषणं विधियते ।

## शुभमुहूर्तनिर्धारणे साधारणलग्नबलविचारः

गर्भाधानादिसंस्कारे अन्ये शुभे मुहूर्ते शुभकार्ये च प्रथमतः साधारणलग्नबलं विचार्यते । तदेव लग्नशुद्धिरिति मन्यते । लग्नशुद्ध्यर्थं प्रत्येकस्मिन् शुभकार्ये प्रायः चन्द्रस्य शुभाशुभमपि परिदृश्यते । मुहूर्तमार्तण्डे साधारणलग्नबलविचारप्रसङ्गे एकं श्लोकप्रमाणं उल्लिखितं विद्यते । नेपालीदेशीये पञ्चङ्गपत्रेऽपि लग्नशुद्धिनिर्देशनसन्दर्भे शास्त्रीयाधारमेतदेव श्लोकं वर्तते । तद्यथा

> " प्रायश्चन्द्रं त्यजान्त्यष्टमरिपुतनुगं भांशकौ मूढनाथौ। क्रूरेन्द्वाप्तौ खलाशं मृतिगतखचरं मृत्युतत्पौ तनुस्थौ । सौम्याः केन्द्रत्रिकोणेष्वरिभवसहजेष्वन्यखेटाः प्रशस्ताः । सर्वत्रैतत्प्रयोज्यं प्रकरणपठितांस्तद्विशेषान्विदित्वा ॥ २ ॥"

साधारणलग्नबलविचारे प्राय अन्त्याष्टमरिपुतनुगतं ( द्वादशाष्टमषष्टप्रथमस्थानं गतं ) चन्द्रमसं त्यजेत् । शुभसंस्कारे शुभकर्मणि च कर्तायाः जन्मराशितः ६,८,१२ स्थानगतः चन्द्रमा त्याज्यो भवति । अस्तङ्गतस्य ग्रहस्य राशिलग्नं नवाशं च त्याज्यम् । तथैव लग्ने पापग्रहस्य राशिः पापग्रहयुतलग्ननवांशश्च त्यज्यते । लग्नादष्टमं स्थानं शुभपापग्रहरहितं शुद्धं भवेत् । लग्ने जन्मराशितः अष्टमराशिः अष्टमेशश्च अशुभो मन्यते । प्रायशः लग्नात् केन्द्रत्रिकोणेषु सौम्याः ग्रहाःप्रशस्ताः मन्यन्ते । पापग्रहाः लग्नात् तृतीयषष्ठैकादशस्थाने शुभाः मन्यन्ते । एतत् श्लोकोक्तं साधारणलग्नबलं गर्भाधानादिकृत्ये अन्यशुभकार्ये च सर्वत्रैव प्रयुज्यते । परन्तु पृथक् प्रकरणे पठितान् विषेशलग्नबलान् पृथक् ज्ञातव्या सन्ति । नेपालदेशीये पञ्चाङ्गे एतत्श्लोकोक्तं साधारणलग्नबलं विचार्य कर्णवेध अन्नप्राशनः चूडाकरणःव्रतबन्धादीनां मुर्हूताः निर्देशिताः दृश्यन्ते । अतः श्लोकप्रमाणमिदं लग्ननिर्धारणस्य शास्त्रीयाधारं द्योतयति । यथा

**अन्नप्राशनमुहूर्तः ,**
... जन्मर्क्षलग्नदेखि अष्टमलग्न र त्यसको नवांशक १, ८, १२ लग्न छाडी केन्द्रत्रिकोणतृतीय स्थानमा शुभग्रह पारी ३, ६, ११ स्थानमा पापग्रह भै १० स्थान शुद्ध गरी... अन्नप्राशन गराउनु ।
तारकेश्वर पञ्चाङ्ग (२०७७) पृ.

**कर्णवेधमुहूर्तः,**

...केन्द्रत्रिकोणमा शुभग्रह, ३, ६,११ स्थानमा पापग्रह भई गुरुशुक्रका लग्नमा अष्टमस्थान शुद्धगरी कर्णवेध गर्नुपर्छ।

हिमाल पञ्चाङ्ग(२०८१) पृ.७१।

**चूडामुहूर्तः,**

... शुभलग्न तथा शुभांशकमा लग्नदेखि अष्टमस्थान शुद्ध गरी ३ । ६ । ११ । स्थानमा पापग्रह पारी चूडा ( मुण्डन) गर्नु,

तोयनाथ पञ्चङ्ग (२०७८) पृ.६६ ।

**प्रथमरजोदर्शनमुहूर्तः**

प्रथमतः गर्भाधानस्य ऋतुसम्बन्धात् नार्याः प्रथमऋतुफलाख्यं प्रथमरजोदर्शनमुहूर्तमग्रे समीक्ष्यते। कुमार्याः प्रथमरजोदर्शने पौषशुक्रोर्जः(पौषज्येष्ठकार्तिकः) मधु(चैत्र) शुचि (आषाढ) नभस्यः (भाद्रपदः) एते षड्मासा अशुभा कथ्यन्ते। अन्येषु मासेसु प्रथमरजोदर्शनं शुभं भवति। पापग्रहाणां वासरे ( रविभौमशनिवासरे ) रिक्ता ( ४,९ ,१४ तिथौ ) अमावास्या द्वादशी षष्ठी अष्टमीतिथौ च प्रथमरजोदर्शनमशुभम्। मिश्रोग्रमूलतीक्ष्णसंज्ञकेषु नक्षत्रेषु ( कृत्तिका विशाखा पूर्वात्रय भरणि मघा अश्लेषा ज्येष्ठा आर्द्राषु ) अपि कुमार्याः प्रथमरजोदर्शनं अशुभमुच्यते। अन्येषु नक्षत्रेषु शुभमिति ज्ञेयम्। योगेषु दुष्टयोगाः (विष्कुम्भः, अतिगण्डः, व्याघातः, वज्रः, व्यतिपातः, परिघः, वैधृतयः) प्रथमरजोदर्शने अशुभाः कथिताः। परगृहे , कुपदे (पितृस्थाने, देवस्थले श्मशाने चादि अशुभस्थाने) च प्रथमरजोदर्शनं अशुभं कथितम् । रात्रीसन्ध्या अपरान्हकाले अपि प्रथमरजोदर्शनं अशुभं ज्ञेयम्। तिथिनक्षत्रलग्नानां गण्डान्त (सन्धि) कालं च अशुभम् ज्ञेयम्। गरादि बबपर्यन्तं करणचतुर्थमपि अशुभम्। तथैव प्रथमरजोदर्शने पापग्रहाणां लग्नानि (मेषसिंहवृश्चिकमकरकुम्भ लग्नानि) अशुभानि कथ्यन्ते। अन्यानि लग्नानि शुभानि भवन्ति । सरक्तनीलचित्रजीर्णाम्बरे रजोदर्शनं अशुभं मन्यते । कुमार्याः प्रथमरजोदर्शनेअनरुणरक्तस्रावं अधिकरक्तस्रावं च अशुभं मन्यते । नेपालदेशीयेषु सर्वेषु पञ्चाङ्गेषु तारकेश्वरतोयनाथपञ्चाङ्गौ प्रथमरजस्वलायाः शुभाशुभफलनिर्देशं कुरुतः ।[४] अन्येषु पञ्चाङ्गेषु प्रथमरजोदर्शनमुहूर्तो निर्दिष्टो नैव विद्यते। परं प्रथमरजस्वलायाः जलस्पर्शनमुहूर्तस्तु प्रकाशितो विद्यते हि। कन्यायाः प्रथमरजोदर्शनकाले दृष्टेन मासतिथियोगकरणानुसारी फलेन तस्य भावीजीवनस्य शुभाशुभफलं

[४] तारकेश्वरपञ्चाङ्गम् , (२०७७), पृ. ६६ ।

कथितुं शक्यते । अद्यतनेऽस्मिन् युगे विषयोऽयं अनुसन्धेयो वर्तते । प्राचीनकाले कन्यायाः प्रथमरजोदर्शनं पतिगृहे भवति स्म । परं अद्यतने काले पितुर्गृहे कन्यायाः प्रथमरजोदर्शनं भवति । पञ्चङ्गपत्रे प्रकाशितेन प्रथमरजोदर्नमुहूर्तेन पिता स्वकन्यायाः भाविजीवनस्य शुभाशुभं बोधयति । अतः पञ्चङ्गपत्रे मुहूर्तोऽयं प्रदर्शनं वाञ्छनीयं दृश्यते ।

## गर्भाधानमुहूर्तः

धर्मपत्न्याः ऋतुकालादनन्तरं मासिकधर्मपश्चात्, रजस्वलापश्चाद्वा गर्भाधानस्य उत्तमशुभमुहूर्तो विचार्यते । स्त्रीयाः रजोदर्शनं प्रत्येकस्मिन् मासे संभवति । रजोदर्शनकालः एव ऋतुकालः ऋतुमासो वा मन्यते । ऋतौ रजोदर्शनादारभ्य चतुर्दिनं विहाय षोडशरात्रयः स्वाभाविको गर्भाधानकाल उच्यते । तत्र नवयौवना स्त्री गर्भधारणे सामर्थ्योत्पादयति । नेपालदेशीयेषु प्रायेषु सर्वेषु पञ्चाङ्गपत्रेषु गर्भाधानादि पुंसवनं सीमन्तोन्नयनं जातकर्मः नामकरणं पालकारोहणं भूम्युपवेशनं दुग्धपानप्रभृतीनां संस्काराणां मुहूर्तास्तु नैव निर्दिष्टा विद्यन्ते । तोयनाथपञ्चाङ्गस्तु विविधमुहूर्तनिर्देशनपृष्ठे नार्याः प्रथमरजोदर्नस्य शुभाशुभकालसहितः गर्भाधानमुहूर्तं निर्देशति ।[५] अन्येषु पञ्चाङ्गेष्वेतन्मुहूर्तमप्रकाशितं विद्यते । तेन वर्तमानयुगे नवविवाहितौ सनातनसंस्कारप्रियौ वधूवरौ गर्भाधानादिसंस्कारणां शुभमुहूर्तानां शास्त्रीयशुभकालस्य ज्ञानात् वञ्चितौ । सर्वगुणसम्पन्नसन्तानप्राप्तिकालस्य ज्ञानाभावे तौ पर्वाष्टमी संक्रात्याद्युक्ते प्रदूषितकाले गर्भाधानकरणे प्रवृत्तौ विद्येते । अतः तयोः नववरवध्वोः प्रत्युपकाराय लोके विषयस्यास्य प्रबोधीकरणाय च पञ्चाङ्पत्रे मुहूर्तनिर्देशनपृष्ठे प्रथमतः गर्भाधानादि पुंसवनसीमन्तोनयनजातकर्मनामकरणादीनां संस्कारणां शुभमुहूर्ताः प्रदातव्याः । पञ्चाङ्गपत्रे अप्रकाशितेन ते मुहूर्ताः जनव्यवहारतः विलुप्ताः जाताः । लोके एतेषां संस्काराणां प्रयोगः चिरकालाद् विलुप्तप्रायः परिदृश्यते । अतोऽत्र मुहूर्तमार्तण्डोक्तानां तेषां संस्कारणां शुभमुहूर्तानां शास्त्रीयसमीक्षा विधियते ।

## पुंसवनसीमन्तोनयनसंस्कारः

गर्भाधानसंस्कारादनन्तरं पुंसवनं सीमन्तोनयनं च संस्कारं विधियते । अत्र प्रथमतः पुंसवनसंस्कारं उल्लिख्यते । पुमांसमिव सूते बलप्रदाने पुरुषवत् जनयति पुमासं सूते अनेन वा इति व्युत्पत्त्यनुसारेण गर्भे पुरुषोत्पत्ति कामाय संस्कारमिदं विधियते । शौर्यवान् वीर्यवान् वा सन्तानोत्त्पत्तिकामाय सुसंस्कृतपुरुषार्थी

[५] तोयनाथपञ्चाङ्गम् (२०८०), पृ. ६८

सन्तानप्राप्त्यर्थं पुंसवनसंस्कारं विधत्ते।[६] गर्भाधानात् द्वितीये तृतीये वा मासे पुंसवनं शुभं मन्यते। पुंभे अर्थात् साभिजित् अष्टाविंशति नक्षत्रेषु मध्येषु पुरुषसंज्ञकेषु नक्षत्रेषु ( पुनर्वसु, पुष्य , हस्ता, अभिजित्, पूर्वभाद्रपदा , अश्विनी , अनुराधा नक्षत्रेषु ) पुंसवनं शुभं भवति ।शुक्लपक्षे रिक्तापर्व (४,९,१४,१५,३०) रहितेषु शुभतिथौ सङ्क्रान्तिरहिते रविगुरुभौमवासरे पुंसवनं शुभं मन्यते। मिथुनरहिते शेषे विषमलग्ने विषमनवमांशे च (मेष, सिंह,तुला,कुम्भलग्ने नवांशे च) लग्नात् द्वादशपञ्चमभावशुद्धे शुभग्रहयुक्ते वा शुभलग्ने पुंसवनसंकारं विधियते।

सीमन्तस्य उन्नयनं सीमन्तोनयनं। अर्थात् सीमन्तोत्पत्तये बलप्रदाने कृतं संस्कारविषेशं सीमन्तोन्नयनं इति । सीमन्तिन्याः सौभाग्याभिवृद्धये, गर्भस्थशिशोः स्वास्थ्यं दीर्घायुश्च प्राप्त्यर्थं संस्कारमिदं सम्पाद्यते । गर्भाधानात् चतुर्थषष्टाष्टमेमासे पुंसवनोक्त तिथिनक्षत्रवासरे तत्रोक्त लग्नबलं च विचार्य सीमन्तोन्नयनसंस्कारं विधियते।

**जातकर्मनामकरणसंस्कारः**

प्रसूतिसमये कृतं संस्कारं जातकर्मसंस्कारम् ।प्रसूतौ जातायां जातकर्मः विधियते। शिशोः जन्मदिने तस्य पिता जातकर्मं करोति। पुत्रजन्मनि सहर्षं पित्रा संपादितं यज्ञकर्मं जातकर्मसंस्कारमुच्यते। जनिमरणशौचकेपि जातकर्मं सम्पाद्यते । कदाचिद् जातकमृतकसूतकयोः प्रसूतिर्भवति तदा जातकर्मविषये सूतकान्तरे जन्ममृत्युसूतकदोषो न भवति । सूतकान्तरे सत्यपि जाते पुत्रे पिता सचैलं स्नानपूर्वकं स्वगृहोक्तविधिना जातकर्मं कुर्यात्। क्षिप्रसंज्ञकेषु ( अश्विनी हस्ता अभिजित् पुष्य ) रोहिणी उत्तरात्रयः श्रवणत्रयः पुनर्वसु स्वाति मृदुसंज्ञकेषु ( अनुराधा रेवति मृगशीरा चित्रा ) नक्षत्रेषु शुभतिथिवासरे च पुंसवनोक्ते शुभलग्ने जातकर्मसंस्कारं[७] सम्पाद्यते।

जातकर्मानन्तरं वर्णानुसारेण नामकरणं विदध्युः । ब्राह्मणादयः क्रमेण जन्मदिवसात् सूर्याष्टिविंशाकृतिमितदिवसे ( १२, १६,२०,२२ मितदिवसे )नामकरणं कुर्यादिति शास्त्रीय नियमो विद्यते । अर्थात् ब्राह्मणो १२ दिवसे क्षत्रीयः १६ दिवसे वैश्यो २० मिते शूद्रो २२ मिते दिवसे नामकरणसंस्करं

[६] आमोदवर्धनः कौडिन्यायन, गर्भसंस्कार र गर्भिणी संरक्षणका शास्त्रीय नियम, देश सञ्चार (सम्पदकः युवराज घिमिरे) , भदौ ८, २०८१ ।

[७] सूतौ जातं विद्ध्यादपि जनिमरणाशौचके वा तदन्ते। क्षिप्रैर्ब्राह्मोत्तराभिश्चरमृदुभिरथो नाम वर्णा विदध्युः। ( मुहूर्तमार्तण्डः अ. ३, श्लो. ५ )।

ISSN-2362-1362 (Print)

कुर्यादिति । धर्मशास्त्रानुसारेणाशौचान्तरे नामकरणं निषेधं वर्तते । जन्ममरणाशौचे आशौचान्ते नामकरणं विधियते । तदा जातकर्मोक्तानि नक्षत्राणि नामकरणसंस्कारे शुभानि अन्यानि भान्यशुभानि मन्यन्ते । रिक्ताष्टमीतिथिं विहाय, भौमशनिवासरं हित्वा चरलग्नं त्यक्त्वा शुभलग्ने नामकरणसंस्कारं वधियते । रात्री अपरान्हकालः नामकरणे नेष्ट, पूर्वान्हे नामकरणं शुभं मन्यते ।

**पालकारोहणमुहूर्तः** जन्मदिनाद् १२ दिवसे बालकं पालके खट्वायां वा उपवेशितुं शुभं मन्यते । उक्तकालातिक्रमे तु ध्रुवमृदुलघुसंज्ञकेषु नक्षत्रेषु षोडशे द्वाविंशे वापि दिवसे बालकं पालकारोहणं कुर्यात् । श्रीविष्णुस्मरणपूर्वकं प्राक्शीर्षं कृत्वा शुभवासरे शुभतिथौ लग्नचन्द्रबलान्विते स्वमाता बालकं पालकारोहणं कुर्यात् ।

**भूम्युपवेशनमुहूर्तः** जन्मतः पञ्चमे मासि बालकं भूम्यां उपवेशयेत् । रिक्तापर्वाष्टमीतिथिवर्जिते शुभदिवसे शुभवासरे च शिशुं भूम्युपवेशनं कार्यं शुभम् । मृगशिरा अश्विनी पुष्य त्र्युत्तरारोहिणी ज्येष्ठानक्षत्रे बालकं भूम्युपवेशनं शुभम् । पृथिवीं वराहस्वरूपं श्रविष्णुं च पूजयित्वा वेदध्वनिमङ्गलपाठसहितं वाद्यवदननादघोषसहितं मन्त्रोच्चारणपूर्वकं बालकं भूम्यामुपवेशयेत् ।

**दुग्धपानमुहूर्तः** जन्मतः एकत्रिंशद्दिने शंखेन बालकं गोदुग्धं पाययेत् ।"एकत्रिंशत् दिने चैव पयःशंखेन योजयेत् " इत्युक्तिरपि प्राप्यते। यदि मातुः स्वल्पपयस्त्वे अन्नप्राशनोक्त नक्षत्रे बालकाय पयः पानं कुर्यादिति व्यवहारिकं दृश्यते ।

**झ) निष्क्रमणमुहूर्तः** जन्मतः चतुर्थे मासि पितुर्गृहात् शिशोः निष्क्रमणं शुभं मन्यते । अत्र निष्क्रमणं नाम गृहात् प्रथमं बहिर्निर्गमः । निष्क्रमणं गमनवतर्थात् यात्रामुहूर्तवत् कर्तव्यम् । यात्राप्रकरणोक्ते शुभमुहूर्ते निष्क्रमणं शुभम् भवति । राहोर्दिङ्मुखबर्जिते दिशि , योगिनी दिक्शूलञ्च विचार्य यात्रामुहूर्ते निष्क्रमणं शुभं भवति । निष्क्रमणसंस्काररहितानां बालकानामायुः श्री निरोगिता च विनश्यति । अतः स्वगृहोक्तविधिना बालकं स्नानपूर्वकं नूतनवस्त्रैः अलङ्कृत्य स्वस्तिवाचनमङ्गलपाठोच्चारणेन देवमन्दिरं नयेत् । मातृस्वसृगृहं गत्वा मातुलादेर्गृहं नयेदिति कस्यचिद् भिन्नमतं च मार्तण्डवल्लभाटीकायां ग्रन्थकारो नारायणदैवज्ञ उल्लिखति ।[८]

[८] आदाय गेहान्निर्गम्य गच्छेयुर्देवतालयम् । अभ्यर्च्य देवतां सम्यगाशिषो वाचयेदथ । कृत्वा प्रदक्षिणं गेहमानयन्ति ततः स्वकम् । मातृस्वसृगृहं गत्वा मातुलादेर्गृहं नयेत् । तदाशीर्वचनाद्यैश्च दीर्घायुरभिनन्दितः ॥

**कर्णवेधमुहूर्तः**

शिशोः कर्णयोः वेधनं तच्छेदनं वा कर्णवेधः कथितः। कर्णयोः च्छेदनकर्मः कर्णवेधोच्यते। जन्मतः समवर्षं त्यक्त्वा विषमवर्षे ( तृतीये पञ्चमे वा वर्षे ) कर्णवेधसंस्कारः शुभो मन्यते । विषमवर्षे चैत्रकार्त्तिकफाल्गुनपौषमासान् त्यक्त्वा अन्येषु मासेषु शुक्लपक्षे रविशनिकुजरहिते शुभग्रहवासरे सोमबुधगुरुशुक्राणां दिने कर्णवेधं कर्तव्यम्। स्वातिशतभिषारोहिणी नक्षत्राणि त्यक्त्वा मैत्रसंज्ञकेषु ( अनुराधा रेवति मृगिशिरा चित्रा ) , क्षिप्रसंज्ञकेषु ( अश्विनी हस्ता अभिजित् ) स्थिरसंज्ञकेषु (उत्तरात्रयरोहिणि ) चरसंज्ञकेषु ( श्रवणत्रय पुनर्वसु ) नक्षत्रेषु कर्णवेधः शुभो मन्यते। रिक्ता ( ४,९,१४) पर्व ( अमावास्यपूर्णिमा ) ईश्वर ( एकादशी ) वसु ( अष्टमी ) तिथिन् विहायः अन्येषु शुभतिथिषु कर्णवेधः शुभः। रात्री सन्ध्याकालं च हित्वा अन्ये शुभसमये पवित्रस्थले देवालये वा बालकस्य प्रथमं दक्षकर्णं कन्यायाः वामकर्णञ्च स्वगृहोक्तविधिना कर्णयोः वेधयेदिति[९] मुहूर्तमार्तण्डस्य संस्कारप्रकरणे उल्लिखितं विद्यते । नेपालदेशीये पञ्चाङ्गपत्रेऽपि मुहूर्तमार्तण्डोक्तः शास्त्रीयकर्णवेधमुहूर्तं निर्दिष्टं विद्यते।

**अन्नप्राशनमुहूर्तः**

अन्नस्य प्राशनं भोजनं यस्मिन् तदन्नप्राशनम्। बालकं बालिकां च प्रथमं अन्नभक्षणरूपसंस्कारविषेश अन्नप्राशनसंस्कारः कथ्यते । "अन्नस्य प्रासनं कार्यं अन्नप्रशनमुच्यते" इत्युक्ति प्रसिद्धैव । बालकस्य षष्टे अष्टमे वा मासे बालिकायाः पञ्चमे सप्तमे वा मासे प्रथमान्नभक्षणस्वरूपसंस्कारं अन्नप्राशनमुच्यते। अस्य संस्कारस्य शास्त्रीयप्रमाणं मुहूर्तमार्तण्डस्य संस्कारप्रकरणे विद्यते । तदाधारे नेपालदेशीयपञ्चाङ्गपत्रे अन्नप्राशनमुहूर्तस्य विधिनिषेधवचनानि शुभमुहूर्तश्च निर्दिष्टो विद्यते।

जन्मतः बालकस्य षष्ठमासे अष्टमे वा मासे कन्यायाः पञ्चमे सप्तमे वा मासे नन्दा ( १,६,११) रिक्ता (४,९,१४) हरि ( १२ ) वसु ( ८ ) तिथिं त्यक्त्वा अन्येषु शुभतिथौ अन्नप्राशनं शुभं निगदितम्। सोमवासरं त्यक्त्वा अन्येषु शुभग्रहस्य वासरे ( बुधगुरुशुक्राणां दिने ) अन्नप्राशनं शुभं कथितम्। जन्मनक्षत्रं विहाय ध्रुव ( उत्तरात्रयरोहिणी ) मृदु ( अनुराधा, रेवति, मृगशीरा,चित्रा ) चर (श्रवणत्रय पुनर्वसु, स्वाति) क्षिप्र (अश्विनी,हस्ता, पुष्य, अभिजित् ) संज्ञकेषु नक्षत्रेषु अन्नप्राशनं प्रशस्तं मन्यते। अजालिमीन( मेष, बृश्चिक,

---

[९] मैत्रैः क्षिप्रैः स्थिरभचरभैव्यार्निलाम्भः पकर्क्षै। श्वैकाफापैाष्विनशनिकुजर्क्षांशवारानपास्य।
रिक्तापर्वेश्वरवसुतिथिन् रात्रिसन्ध्ये समाब्दं। पुंस्त्रीकर्णै सविधिपटुना दक्षवामादिवेध्यौ। (मुहूर्तमार्तण्डः, अ.३. श्लो. ७.)

मीन ) लग्नं बर्जयित्वा शेषेषु लग्नेषु अष्टमद्वादशस्थानशुद्धिवशात् केन्द्रत्रिकोणेषु शुभग्रहयुक्तेषु शुभमुहूर्तेषु अन्नप्राशनं शुभं निगदितम् । अन्नप्राशनलग्ने पूर्णबलयुक्ते चन्द्रे अवस्थिते तु गुणाधिक्यं विशेषशुभदायकं मन्यते । अरिष्टः निर्बलः क्षीणचन्द्रश्च अन्नप्राशने त्याज्यो भवति । ग्रन्थोक्ते श्लोके एतत् सर्वं सूचितं वर्तते ।[१०] नेपालदेशीये पञ्चाङ्गपत्रे अत्रोक्तानुसारेण शुभतिथयः शुभवाराः ग्राह्यनक्षत्राणि ग्राह्यलग्ननवमांशाः लग्नशुद्धिः दशमस्थानशुद्धिसहितं चन्द्रबलञ्च विचार्य अन्नप्राशनं कुर्यादिति निर्देशो विद्यते ।[११] सम्प्रति सर्वेषु पञ्चाङ्गेषु सौरमासस्य गतदिवसानुसारेणापि पञ्चाङ्गस्य पृथक्पृष्ठे अन्नप्राशनमुहूर्तो निर्दिष्टो वैर्तते । तेन जनहितोपकारं परिलक्ष्यते ।

**चूडाकरणमुहूर्तः**

चूडायाः करणं कर्म चूडाकरणमुच्यते । शिरोमध्यस्थ बद्धशिखामात्रं चूडाकरणम् । दशसंस्कारान्तर्गतः संस्कारविशेषः चूडाकरणसंस्कारः । चौलं शिखाकरणं जुटिकाबन्धनं क्षौरमुण्डनं च चूडाकरणस्य पर्यायाः शास्त्रेषूल्लिखिता प्राप्यन्ते । ब्राह्मणादीनां चूडाकरणं पृथक् पृथक् वर्षे क्रियते । स्वकुलाचारावशात् द्वितीये तृतीये पञ्चमे वा वर्षे चूडाकरणं कर्तव्यम् । अत्र उक्तेषु वर्षेषु कुमारस्य जननी यदि सगर्भा स्यात्तदा एतत् कर्मं न कर्तव्यम् । परन्त्वूपनयनेन सह चूडाकरणे क्रिते तु मातुः गर्भिण्याः दोषं न भवति । अम्बार्तवे मातुः रजोदोषे शुद्धिपर्यन्तं चौलव्रतमुपनयनं न कर्तव्यम् । उपर्युक्तेषु वर्षेषु चैत्ररहितेषु माघादिसु पञ्चमासेसु चूडाकरणं चौलं वा निगद्यते ।

पुनश्च चूडाकरणे वारनक्षत्रतिथिनुल्लिख्यते । वर्णविशेषेण वार विशेषं कथ्यते । विप्रेण रविवासरे क्षत्रियेण भौमवारे वैश्येन शनिवासरे शूद्रेणापि शनिवासरे चौलकार्यं निगदितम् । सर्वै वर्णैः ज्ञत्रये वारे (बुधगुरुशुक्रवसरे ) शुक्ले सोमवासरे चौलं कर्तव्यं भवति । चौलकर्मोक्तानि शुभनक्षत्राणि रेवति अश्विनी पुनर्वसुपुष्यौज्येष्ठा मृगशीर्षः हस्ताचित्रास्वति श्रवणधनिष्ठाशतभिषाः सन्ति ।

पुनश्च ग्रन्थकारः नारायणदैवज्ञः चूडाकरणे लग्नशुद्धिः प्रदर्शयति । लग्नात् सप्तमस्थाने सूर्यभौमशनिशुक्राः कष्टकारकाः उच्यन्ते । शुक्रं विहाय अन्याःग्रहाः अष्टमे शुभदायकाः भवन्ति । चन्द्ररहिताः सर्वे ग्रहाः लग्नात्

---

[१०] मासेषष्ठेऽष्टमे नुर्निगदितमशनं पञ्चमे सप्तमे वा । भीरोरुज्झन्ति नन्दा हरिवसुरजनीरिक्तका स्वर्क्षमेके ।।
सदृक्कांशाह्न्यचन्द्रे ध्रुवमृदुचरभं क्षिप्रभेऽजालिमीनो । नाङ्गे केन्द्रत्रिकोणान्त्यमृतिषु विमलास्विन्दुरिष्टोखिलोङ्गे ।।
(मुहूर्तमार्तण्डः अ.३, श्लो. ८ ) ।

[११] नरनाथपञ्चाङ्गम् ( २०५९) , नरनाथशर्मणा विरचितम्, मीनराजशर्मणा प्रकाशितम्, पृ. ४५ ।

द्वादशे शुभाःभवन्ति । चूडाकरणे षष्ठी पूर्णिमा रिक्ता(४,९,१४)तिथयः अशुभाः सन्ति । अन्याः तिथयः शुभा कथिताः । सन्ध्यासमये रात्रीकाले च चूडाकरणं क्षौरकर्म मुण्डनं च अशुभो मन्यते[12] । मर्तण्डवल्लभाटीकायां चूडाकरणक्षौरमुण्डनविषये शास्त्रीयविशेषप्रमाणानि प्राप्यन्ते । नेपालदेशीये पञ्चाङ्गपत्रे मुहूर्तमार्तण्डोक्तः शास्त्रीयप्रमाणवचनानुसारेणैव चूडाकरणं मुण्डनमुहूर्तञ्च निर्दिष्टं विद्यते । तत्रास्य मुहूर्तस्य ग्राह्याग्राह्यः वर्षमासतिथयः वाराः नक्षत्राणि लग्नशुद्धिश्च प्रदर्शितो विद्यते । परन्तु सौरमासानुसारेण गतदिवसाधारे मुहूर्तोऽयं नैव निर्दिष्टमस्ति ।

**व्रतबन्धसंकारः**

शास्त्रकारैः ब्राह्मणादीनां व्रतब्रन्धकालं द्विविधं उल्लिखितम् । ब्रह्मक्षत्रविशां मुख्यं गौणं च व्रतबन्धकालमस्ति । गर्भतः जन्मतो वा अष्ट (८) शिव (११) रवि (१२) मिते अब्दे विप्रादेर्व्रतं शुभं स्यात् । एतत्तु व्रतबन्धस्य मुख्यकालं मन्यते । विप्रस्याष्टमेवर्षे क्षत्रियस्य एकादशेवर्षे वैश्यस्य द्वादशेवर्षे व्रतबन्धस्य मुख्यकालं निगदितमस्ति । अत्र स्वस्ववर्षे बृहस्पति अनिष्टे अशुभे सत्यपि व्रतबन्धनं शुभं निगदितम् । वर्षस्य दार्ढ्यात् (बलात् ) वर्षबलात् जीवे अनिष्टे अपि स्वस्वमुख्यवर्षे चैत्रमासे मीनगते रवौ ब्राह्मणादीनां व्रतबन्धनं शुभं भवति । स्वस्ववर्षादूर्ध्वाद् द्विगुणिते वर्षे अब्दक्रमेण व्रतबन्धनं शुभमुल्लिखितं विद्यते । अर्थात् ब्राह्मणस्याष्टमं वर्षं मुख्यकालं तद् द्विगुणितं षोडशमष्टवर्षात्षोडशवर्षपर्यन्तं गौणकालं चेति । एवं क्रमेण एकादशवर्षात् द्वाविंशवर्षपर्यन्तं क्षत्रियस्य गौणकालं द्वादशवर्षात् चतुर्विंशति वर्षपर्यन्तं वैश्यस्य गौणकालञ्चेति । तदूर्ध्वं उत्तरोत्तर निन्द्यं भवति । एषां ब्राह्मणक्षत्रविशां वेदाध्ययनरुचितः क्रमेण पञ्चाष्टनवमवर्षे तद्व्रतबन्धनं शुभं निगदितम् । वेदप्रपठनरुचितः ब्राह्मणस्य पञ्चमे वर्षे क्षत्रियस्याष्टमे वर्षे वैश्यस्य नवमे वर्षेऽपि व्रतबन्धनं शोभनं मन्यन्ते शास्त्रकाराः । नेपालदेशीये पञ्चाङ्गपत्रे व्रतबन्धस्य मुख्यगौणकालस्य प्रकाशनाभावात् सनातनसंस्कारप्रियजना एतज्ज्ञानात् विमुखाःजायन्ते । तेन जनाः दिग्भ्रमितभूताः दृश्यन्ते ।

**व्रतबन्धे गुरुबलाबलविचारः**

अत्र उपनयने गुरुबलं उल्लिख्यते । उपनयनकर्तायाः( वटोः) जन्मराशितः षट्त्र्याद्यखस्थो गुरुः इहास्मिन् व्रतबन्धे पूजया शुभदः स्यात् । अर्थात् षष्ठं तृतीयं प्रथमं दशमं एषु राशौ गुरुः तिष्ठति तदा पूजया

[१२] द्रष्टव्यः मुहूर्तमार्तण्डः , अ. ३, श्लो. १०,११,१२,१३ ।

शुभदःस्यादित्यर्थ । प्रान्तोम्बुस्थो अष्टमो नो शस्तः । अर्थात् जन्मराशितः द्वादश चतुर्थ अष्टमस्थः गुरुः पूजयापि नो शस्तः कथितः । परन्तु निजगृह निजोच्चस्थश्चेत्तदा शुभदो भवति । एवं कन्यायाः विवाहे अपि एतद् गुरुबलं विचार्यं भवति । जन्मराशितः २,५,७,९, ११ स्थानस्थितः बृहस्पतिः व्रतबन्धे विवाहे च शोभनं स्यात् । यदि विवाहकाले व्यतिते सति अनिष्टे अपि द्विगुणितपूजया शोभनं स्यात् । यदि अष्टमभवनगतश्चेद् त्रिगुणितपूजया शुभं भवति ।

## व्रतबन्धे मासतिथिनक्षत्राणि

उत्तरायणे माघादिसु पञ्चमासेषु ज्येष्ठान्तेषु शुक्लपक्षे उपनयनं शुभं स्यात् । रविसोमबुधगुरुशुक्रेषु दिनेसु तस्मिन् दिने अह्नः प्राग्दले दिवसस्य पूर्वार्धे व्रतबन्धः सत् स्यात् । अनध्यायतिथि(चतुदर्शी, अमावास्या, पूर्णिमा, प्रतिपदा, अष्टमी ) , रिक्ता सप्तमी त्रयोदशीतिथिं विहायः अन्येषु शुभतिथिषु उपनयनं शुभं कथितम् । मघा भरणी ज्येष्ठा विशाखा कृत्तिका एतन्नक्षत्रपञ्चकं त्यक्त्वा अन्येसु नक्षत्रेषु व्रतबन्धमुहूर्तः शुभं मन्यते ।

## व्रतबन्धलग्नशुद्धिः

व्रतबन्धलग्ने चन्द्रमा, पापग्रहाश्च लग्नभङ्गं कुर्वन्ति । शशिशुक्रलग्नेशाः लग्नात् षष्ठाष्टमद्वादशस्थानगताश्चेद् लग्नभङ्गं कुर्वन्ति । एते सर्वे एके वा अष्टमस्थाने गच्छन्ति चेद् बटुमारकाः भवन्ति । उच्चस्थ चन्द्रमा लग्नगतश्चेद् प्रशस्तः शुभो भवतीति केचिद् मुनयः वदन्ति । लग्नाभावे तनुगतसूर्य अपि श्रेष्ठो मन्यते । व्रतबन्धलग्ने एव विद्यारम्भो क्रियते । गणेशं गिरमपि विधिवत् पूजयित्वा द्विस्वभावलग्ने वेदारम्भो विद्यारम्भश्च क्रियते ।

## व्रतबन्धलग्नं तद्फलञ्च

व्रतबन्धलग्ने सौम्याः शुभग्रहाः स्वोच्चाःस्वगृहगताः स्वांशे च वर्तमानाः चेद्यदि बटुः वेदार्थवेत्ता भवति । वेदाधिपति( गुरुसितकुजवित् संज्ञका वेदपाः स्युः ) अपि स्वोच्चे स्वभांशे स्थितश्चेद् बटुः शास्त्रवेत्ता भवति । अन्याः शुभग्रहाश्च व्रतबन्धलग्नात् केन्द्रे कोणे स्थिताः स्युस्तदा बटुः न केवलं वेदार्थवेत्ता स्यात् अपितु पशुगृहधनैश्वर्यवान् भवति । अत्र केन्द्रे कोणे शनिर्नभवतु । यदि शनौ केन्द्रे कोणे तिष्ठति सति बटुः अन्त्यसेवी नीचसेवकः नीचसंसर्गगामी स्यादिति शास्त्रकाराः वदन्ति ।

**निष्कर्षसारांशोपलब्धिश्च**

नेपालदेशीयेषु पञ्चाङ्गपत्रेषु ज्योतिषशास्त्रीयाणां व्रतपर्वाद्युपेतानां मुहूर्तानां निर्देशनक्रमे संस्कारसम्बद्धाः विविधाः मुहूर्ताः प्रकाशिताः विद्यन्ते । पञ्चाङ्गपत्रेषु मुहूर्तनिर्देशनक्रमे उपान्त्यभागस्थे पृथगेकस्मिन् पृष्ठे अन्नप्राशनादि द्वात्रिंशदधिकानां विविधविषयान्वितानां मुहूर्तानां प्रकाशनस्य सुदीर्घा परम्परा दृश्यते । सा नेपालदेशीया परम्परा मुहूर्तशास्त्राधारिता विद्यते नवेति अन्वेषणीयो विषयो वर्तते । प्रसङ्गेस्मिन् नेपालदेशीयपञ्चाङ्गपत्रेषु निर्देशितानां गर्भाधानादीनां संस्काराणां शुभमुहूर्तस्य शास्त्रीयाधारभूतस्य मुहूर्तमार्तण्डस्य संस्कारप्रकरणेवर्णितानां गर्भाधानादिव्रतबन्धपर्यन्तानां संस्कारणामत्र समीक्षा विहिता । समीक्षणाक्रमे नेपालदेशीयपञ्चाङ्गपत्रेषु गर्भाधानादिदशसंस्कारणां निर्देशः नैव प्रकाशितो विद्यते इत्यवज्ञातमभूत् । तत्र प्राग्जन्मसंस्काराः शिशुसंस्काराश्च नैव निर्देशिताः न च प्रकाशिताः विद्यन्ते । प्रथमरजोदर्शनं गर्भाधानं पुंसवनसीमन्तोनयनं जातकर्मनामकरणं पालकारोहणं भूम्यूपवेशनं दुग्धपानं निष्क्रमणञ्चेति संस्कारणां शुभमुहूर्ताः पञ्चाङ्गपत्रेषु नैवोपलभ्यन्ते । अतः नेपालनिवासिनः हिन्दूसनातनसंस्कारप्रियजना उक्तसंस्कारजन्यः शास्त्रीयसामान्यज्ञानार्जने वञ्चिताः प्रायः विमुखाः जाता । तद्शास्त्रीयज्ञानस्याभावे ते संस्काराः नेपालीजनेषु विलुप्तप्रायाः सञ्जाताः । पञ्चाङ्गपत्रे गर्भाधानमुहूर्तप्रदाने पञ्चाङ्गकाराणां लज्जायाः मनोविज्ञानमस्तीति अनुभूयते । तेन गर्भाधानपुंसवनसीमन्तोन्नयनस्य महत्त्वमौचित्यञ्च सम्प्रति विलुप्तप्रायो जातः । पुनश्च जातकर्मनामकरणसंस्कारस्य शास्त्रीयाधारञ्च पतनोन्मुखं विद्यते । पालकारोहणं भूम्यूपवेशनं दुग्धपानं निष्क्रमणञ्चेति संस्काराश्च लुप्तप्रायाः जाताः । अन्नप्राशनं कर्णवेधः चूडाकरणं व्रतबन्धसंस्काराश्च सम्प्रति विस्मृता इव परिदृश्यन्ते । अतः एतेषां संस्कारणां सम्यक् सूचना नेपालदेशीयेषु पञ्चाङ्गपत्रेषु प्रकाशिते सति लोके जनव्यवहारे चोपयुज्यन्ते । एतेषां संस्काराणां संरक्षणाय पञ्चाङ्गपत्रे शास्त्रीयविधिनिषेधसहितं सरलीकरणपूर्वकं देवभाषायां जनभाषायां च प्रकाशनं प्रसारणमावश्यकं दृश्यते । मानवजीवने तेषां महत्त्वमुद्देश्यमौचित्यमावश्यकता चोद्घाटनार्थं शोधकार्यमपि तद्विज्ञैः करणीयमिति शुभमस्तु ।

## सन्दर्भसामग्रीविवरणम्


कौडिन्न्यायनः, आमोदवर्धनः (२०८१), *गर्भसंस्कार र गर्भिणी संरक्षणका शास्त्रीय नियम*, देश सञ्चार (सम्पादकः युवराज घिमिरे) , भदौ ८।

त्रिपाठी, पद्मनाभ (२०८१), *हिमालपञ्चाङ्गम्* , (सम्पा. विश्वनाथत्रिपाठिशर्मा ) , सन्तोषत्रिपाठिशर्मा ।

नारायणदैवज्ञः ( सन् २०१५) *मुहूर्तमार्तण्डः*, तृ.सं. ( मार्तण्डवल्लभा संस्कृतव्याख्या केदारदत्तजोशीकृद् हिन्दीव्याख्यान्विता), मोतीलाल वनारसी दास।

*नेपालसंस्कृतविश्वविद्यालयपञ्चाङ्गम्* (२०८०), नेपालसंस्कृतविश्वविद्यालय।

पन्तः, सूर्यनाथ (२०८०), *तोयानाथपञ्चाङ्गम्,* चतुर्भुजप्रकाशनम्।

पन्थी, लक्ष्मीकान्त (२०७३), *हिन्दू संस्कार परिचय र विमर्श* , रत्न पुस्तक भण्डार।

भट्टराई, पुरुषोत्तम, *"व्रतबन्ध र विवाहसंस्कारमा मुहूर्त निर्धारणको शास्त्रीय व्यवस्था र नेपाली परम्परामा देखिएको भिन्नता एवम् एकरूपताको उपाय", गोष्ठीपत्र,* वाल्मीकिविद्यापीठ, २०८० ज्येष्ठ ११- १२।

मिश्रः, सत्येन्द्रकुमार (२०७९), *विश्व पञ्चाङ्गम्* , (सम्पा.), काशी हिन्दू विश्वविद्यालयः।

शर्मा, दिव्यपुरुष (२०७७), *तारकेश्वरपञ्चाङ्गम्* , दिव्यपुरुषशर्मा।

शर्मा, नरनाथ (२०८०), *नरनाथपञ्चाङ्गम्* , मीनराजशर्मणा ।

*संस्कारप्रकाश* (२०७८), (अष्टमसंस्करणम् ), गीताप्रेस।